# माया पञ्चकम्

निरुपमनित्यनिरंशकेऽप्यखण्डे मयि चिति सर्वविकल्पनादिशून्ये।

घटयति जगदीशजीवभेदं त्वघटितघटनापटीयसी माया॥ १

श्रुतिशतनिगमान्तशोधकान-प्यहह धनादिनिदर्शनेन सद्यः।

कलुषयति चतुष्पदाद्यभिन्ना-नघटितघटनापटीयसी माया॥ २

सुखचिदखण्डविबोधमद्वितीयं वियदनलादिविनिर्मिते नियोज्य।

भ्रमयति भवसागरे नितान्तं त्वघटितघटनापटीयसी माया॥ ३

अपगतगुणवर्णजातिभेदे सुखचिति विप्रविडाद्यहङ्कृतिं च।

स्फुटयति सुतदारगेहमोहं त्वघटितघटनापटीयसी माया॥ ४

विधिहरिहरविभेदमप्यखण्डे बत विरचय्य बुधानपि प्रकामम्।

भ्रमयति हरिहरभेदभावा-नघटितघटनापटीयसी माया॥ ५

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्री गोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छङ्करभगवतः कृतौ माया पञ्चकम् संपूर्णम्॥

# māyā pañcakam

nirupama-nitya-niraṁśake'pyakhaṇḍe mayi citi sarva-vikalpanādi-śūnye ।

ghaṭayati jagadīśa-jīva-bhedaṁ tvaghaṭita-ghaṭanā-paṭīyasī māyā ।। 1

śruti-śatanigamānta-śodhakāna-pyahaha dhanādinidarśanena sadyaḥ ।

kaluṣayati catuṣpadādyabhinnā-naghaṭita-ghaṭanā-paṭīyasī māyā ।। 2

sukha-cidakhaṇḍa-vibodham-advitīyaṁ viyadanalādi-vinirmite niyojya ।

bhramayati bhava-sāgare nitāntaṁ tvaghaṭita-ghaṭanā-paṭīyasī māyā ।। 3

apagata-guṇa-varṇa-jāti-bhede sukhaciti vipra-viḍādyahaṅkṛtiṁ ca ।

sphuṭayati suta-dāra-geha-mohaṁ tvaghaṭita-ghaṭanā-paṭīyasī māyā ।। 4

vidhi-harihara-vibhedamapyakhaṇḍe bata viracayya budhānapi prakāmam ।

bhramayati hari-hara-bheda-bhāvā-naghaṭita-ghaṭanā-paṭīyasī māyā ।। 5

iti śrīmatparamahaṁsa-parivrājakācāryasya

śrī govinda-bhagavat-pūjyapāda-śiṣyasya

śrīmacchaṅkara-bhagavataḥ kṛtau māyā pañcakam saṁpūrṇam ।।